Roll No. ........................ Total No. of Pages : 3

Total No. of Questions : 11

# उत्तरमध्यमा द्वितीयखण्ड

## विषय कोड : 825

## साहित्यम्

## पञ्चम् प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

---

**सर्वे** प्रश्नाः समाधेयाः।

1. उचितं विकल्पं चिनुत : 10

(क) किरातार्जुनीयम् कस्य रचना अस्ति ?

(भारवेः, जयदेवस्य)

(ख) किरातार्जुनीयम् ग्रन्थे कति सर्गाः सन्ति ?

(पञ्चदश, अष्टादश)

(ग) किरातार्जुनीयम् परिगण्यते –

(बृहत्त्रयीमध्ये, लघुत्रयीमध्ये)

(घ) किरातार्जुनीयस्य द्वितीये सर्गे कति श्लोकाः सन्ति ?

(59, 79)

(ङ) किरातार्जुनीयम् कीदृशं काव्यं अस्ति ?

(खण्डकाव्यम्, महाकाव्यम्)

2. किरातार्जुनीयद्वितीयसर्गस्य प्रश्नपत्र आगतान् श्लोकान् विहाय श्लोकद्वयं लिखत। 5

3. "भारवेरर्थगौरवम्" इति नातिविस्तरेण विवेचयत (संस्कृतेन)। 5

**अथवा**

महाकवि भारवेः जीवनवृत्तं संस्कृतेन लिखत।

4. किरातार्जुनीयद्वितीयसर्गस्य कथासारं सरलसंस्कृतेन संक्षेपेण लिखत। 5

5. अधोलिखितेषु श्लोकेषु श्लोकद्वयस्य संस्कृतेन व्याख्या विधेया : 10

(क) विहितां प्रियया मनः प्रियां
अथ निश्चित्य गिरं गरीयसीम्।
उपपत्तिमदूर्ज्जिताश्रयं
नृपमूचे वचनं वृकोदरः॥

(ख) विपदोऽभिभवन्त्यविक्रमं–
रहयत्यापदुपेतमायतिः।
नियता लघुता निरायते–
रगरीयान्न पदंनृपश्रियः॥

(ग) ज्वलितं न हिरण्यरेतसं
चयमास्कन्दति भस्मनां जनः।
अभिभूतिभयादसूनताः
सुखमुज्झन्ति न धाम मानिनः॥

6. यथायोग्यं योजयत : 5

| | |
|---|---|
| (क) वनेचरः | कर्णः। |
| (ख) द्रौपदी | धृतराष्ट्र-पुत्रः। |
| (ग) राधेयः | पाण्डवानां पत्नी। |
| (घ) दुर्योधनः | परशुरामः। |
| (ङ) जामदग्न्यः | युधिष्ठिरः। |

7. वृत्तरत्नाकरं अवलम्ब्य सरलसंस्कृतेन संक्षिप्तं लेखं लिखत। 15

8. भट्टकेदारस्य परिचयं सरलसंस्कृतेन लिखत। 15

9. वृत्तस्य कतिभेदाः प्रथमे भवन्ति तेषां संक्षेपेण विवेचनं कुरुत। 10

10. स्रग्धरा-वृत्तस्य लक्षणोदाहरणं लिखत। 10

11. मन्दाक्रान्ता-वृत्तस्य लक्षणोदाहरणं लिखत। 10